শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৭৫

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

श्रीः
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৭৫

*কংসৱধৱর্ণনম্*

প্রাতঃ সন্ত্রস্তভোজক্ষিতিপতিৱচসা প্রস্তুতে মল্লতূর্যে
সঙ্ঘে রাজ্ঞাং চ মঞ্চানভিযযুষি গতে নন্দগোপেঽপি হর্ম্যম্।
কংসে সৌধাধিরূঢে ত্ৱমপি সহবলঃ সানুগশ্চারুৱেষো
রঙ্গদ্ৱারং গতোঽভূঃ কুপিতকুৱলযাপীডনাগাৱলীঢম্॥ ১ ॥

পাপিষ্ঠাপেহি মার্গাদ্ দ্রুতমিতি ৱচসা নিষ্ঠুরক্রুদ্ধবুদ্ধে-
রম্বষ্ঠস্য প্রণোদাদধিকজৱজুষা হস্তিনা গৃহ্যমাণঃ।
কেলীমুক্তোঽথ গোপীকুচকলশচিরস্পর্ধিনং কুম্ভমস্য
ৱ্যাহত্যালীযথাস্তৱং চরণভুৱি পুনর্নির্গতো ৱল্গুহাসী॥ ২ ॥

হস্তপ্রাপ্যোঽপ্যগম্যো ঝটিতি মুনিজনস্যেৱ ধাৱন্ গজেন্দ্রং
ক্রীডন্নাপাত্য ভূমৌ পুনরপিপততস্তস্য দন্তং সজীৱম্।
মূলাদুন্মূল্য তন্মূলগমহিতমহামৌক্তিকান্যাত্মমিত্রে
প্রাদাস্তৱং হারমেভির্ললিতৱিরচিতং রাধিকাযৈ দিশেতি॥ ৩ ॥

গৃহ্ণানং দন্তমংসে যুতমথ হলিনা রঙ্গমঙ্গাৱিশন্তং
ত্ৱাং মঙ্গল্যাঙ্গভঙ্গীরভসহৃতমনোলোচনা ৱীক্ষ্য লোকাঃ।
হংহো ধন্যো নু নন্দো নহি নহি পশুপালাঙ্গনা নো যশোদা
নো নো ধন্যেক্ষণাঃ স্মস্ত্রিজগতি ৱযমেৱেতি সর্ৱে শশংসুঃ॥ ৪ ॥

পূর্ণং ব্রহ্মৈৱ সাক্ষান্নিরৱধি পরমানন্দসান্দ্রপ্রকাশং
গোপেষু ত্ৱং ৱ্যলাসীর্ন খলু বহুজনৈস্তাৱদাৱেদিতোঽভূঃ।
দৃষ্টৱাথ ত্ৱাং তদেদম্প্রথমমুপগতে পুণ্যকালে জনৌঘাঃ
পূর্ণানন্দা ৱিপাপাঃ সরসমভিজগুস্তৱতকৃতানি স্মৃতানি॥ ৫ ॥

www.prapatti.com

চাণূরো মল্লৱীরস্তদনু নৃপগিরা মুষ্টিকো মুষ্টিশালী
ত্বাং রামঞ্চাভিপেদে ঝটঝটিতি মিথো মুষ্টিপাতাতিরূক্ষম্।
উতপাতাপাতনাকর্ষণৱিৱিধরণান্যাসতাং তত্র চিত্রং
মৃত্যোঃ প্রাগেৱ মল্লপ্রভুরগমদযং ভূরিশো বন্ধমোক্ষান্॥ ৬ ॥

হা ধিক্ কষ্টং কুমারৌ সুললিতৱপুষৌ মল্লৱীরৌ কঠোরৌ
ন দ্রক্ষ্যামো ব্রজামস্তৱরিতমিতি জনে ভাষমাণে তদানীম্।
চাণূরং তং করোদভ্রামণৱিগলদসুং পোথযামাসিথোর্ৱ্যাং
পিষ্টোভূন্মুষ্টিকোপি দ্রুতমথ হলিনা নষ্টশিষ্টৈর্দধাৱে॥ ৭ ॥

কংসঃ সংৱার্য তূর্যং খলমতিরৱিদন্ কার্যমার্যান্ পিতৄংস্তা-
নাহন্তুং ৱ্যাপ্তমূর্তেস্তৱ চ সমশিষদ্দূরমুৎসারণায।
রুষ্টো দুষ্টোক্তিভিস্তৱং গরুড ইৱ গিরিং মঞ্চমঞ্চন্নুদঞ্চত
খডগৱ্যাৱল্গদুসসঙগ্রহমপি চ হঠাত্ প্রাগ্রহীরৌগ্রসেনিম্॥ ৮ ॥

সদ্যো নিষ্পিষ্টসন্ধিং ভুৱি নরপতিমাপাত্য তস্যোপরিষ্টা-
ত্ত্বয্যাপাত্যে তদৈৱ ত্বদুপরি পতিতা নাকিনাং পুষ্পৱৃষ্টিঃ।
কিং কিং ব্রূমস্তদানীং সততমপি ভিযা ত্বদ্গতাত্মা স ভেজে
সাযুজ্যং ত্বদ্বধোত্থা পরম পরমিযং ৱাসনা কালনেমেঃ॥ ৯ ॥

তদভ্রাতৄন্নষ্ট পিষ্টৱা দ্রুতমথ পিতরৌ সন্নমন্নুগ্রসেনং
কৃত্বা রাজানমুচ্চৈর্যদুকুলমখিলং মোদযন্ কামদানৈঃ।
ভক্তানামুত্তমং চোদ্ধৱমমরগুরোরাপ্তনীতিং সখাযং
লব্ধৱা তুষ্টো নগর্যাং পৱনপুরপতে রুন্ধি মে সর্ৱরোগান্॥ ১০ ॥

**********